| | पृ.सं. | पं.सं. |
|---|---|---|
| **न** | | |
| नयः | ४२ | ४ |
| निर्गमनं | ३८ | २० |
| **प** | | |
| प्रतिज्ञा | २४ | ७ |
| प्रत्यभिज्ञानं | १७ | ७ |
| प्रत्यक्षप्रमाणं | ८ | ३ |
| प्रमाणं | ३ | १ |
| परार्थानुमानं | २३ | २० |
| परीक्षा | २ | २२ |
| परोक्षज्ञानं | १९ | १२ |
| पारमार्थिकप्रत्यक्षं | ११ | २४ |
| **म** | | |
| मनःपर्ययज्ञानं | १२ | ५ |
| **ल** | | |
| लक्षणं | २ | ४ |
| **व** | | |
| व्याप्तिः | १८ | ७ |
| विकलज्ञानं | १२ | २ |
| विपर्ययः | ३ | ७ |
| विरुद्धहेत्वाभासः | ३४ | २४ |
| **स** | | |
| स्मृतिः | १६ | ११ |
| स्वार्थानुमानं | २२ | १० |
| सकलज्ञानं | १२ | ८ |
| सत् | ४१ | ५ |
| संशयः | ३ | ४ |
| साध्यः | २१ | १३ |
| साधनं | २१ | १२ |
| सांव्यवहारिकप्रत्यक्षं | १० | २० |
| **ह** | | |
| हेत्वाभासः | ३४ | १९ |
| हेतुः | २४ | ८ |

ॐ

नमः सिद्धेभ्यः ।

# सनातनजैनग्रंथमाला ।

१०

श्रीधर्मभूषणयतिविरचिता

# न्यायदीपिका ।

**श्रीवर्धमानमर्हंतं नत्वा बालप्रबुद्धये ।**
**विरच्यते मितस्पष्टसंदर्भन्यायदीपिका ॥१॥**

"प्रमाणनयैरधिगमः" इति महाशास्त्रतत्त्वार्थसूत्रं । तत्खलु परमपुरुषार्थनिःश्रेयससाधनसम्यग्दर्शनादिविषयभूतजीवादितत्त्वाधिगमोपायनिरूपणपरं । प्रमाणनयाभ्यां हि विवेचिता जीवादयः सम्यगधिगम्यंते । तद्व्यतिरेकेण जीवाद्यधिगमे प्रकारांतरासंभवात् । तत एव जीवाद्यधिगमोपायभूतौ प्रमाणनयावपि विवेक्तव्यौ । तद्विवेचनपराः प्राक्तनग्रंथाः संत्येव, तथापि केचिद्विस्तृताः केचिद्गंभीरा इति न तत्र बालानामधिकारः । ततस्तेषां सुखोपायेन प्रमाणनयात्मकन्यायस्वरूपप्रतिबोधकशास्त्राधिकारसंपत्तये प्रकरणमिदमारभ्यते । इह हि प्रमाणनयविवेचनमुद्देश-लक्षणनिर्देश-परीक्षाद्वारेण क्रियते । अनुद्दिष्टस्य लक्षणनिर्देशानुपपत्तेः । अनिर्दिष्टलक्षणस्य परीक्षितुमश-

## अथ द्वितीयः प्रकाशः ।

अथ प्रमाणविशेषस्वरूपप्रकाशनाय प्रस्तूयते—प्रमाणं द्विविधं प्रत्यक्षं परोक्षं चेति ।

तत्र विशदप्रतिभासं नाम प्रत्यक्षं । इह प्रत्यक्षं लक्ष्यं, विशदप्रतिभासत्वं लक्षणं । यस्य प्रमाणभूतस्य ज्ञानस्य प्रतिभासो विशदस्तत्प्रत्यक्षमित्यर्थः ।

किमिदं विशदप्रतिभासत्वं नाम ? उच्यते,—ज्ञानावरणस्य क्षयाद्विशिष्टक्षयोपशमाद्वा शब्दानुमानाद्यसंभवि यन्नैर्मल्यमनुभवसिद्धं । दृश्यते खल्वाग्निरस्तीत्याप्तवचनाद्धूमादिलिंगाच्चोत्पन्नाज्ज्ञानादयमग्निरित्युत्पन्नस्यैंद्रियिकस्य ज्ञानस्य विशेषः । स एव नैर्मल्यं वैशद्यं स्पष्टत्वमित्यादिभिः शब्दैरभिधीयते । तदुक्तं भगवद्भिरकलंकदेवैर्न्यायविनिश्चये-"प्रत्यक्षलक्षणं प्राहुः स्पष्टं साकारमंजसा" इति । विवृतं च स्याद्वादविद्यापतिना "निर्मलप्रतिभासत्वमेव स्पष्टत्वं । स्वानुभवप्रसिद्धं चैतत्सर्वस्यापि परीक्षकस्येति नातीव निर्बाध्यते" इति । तस्मात् सुष्टूक्तं विशदप्रतिभासात्मकं ज्ञानं प्रत्यक्षमिति ।

"कल्पनापोढमभ्रांतं प्रत्यक्षं" इति ताथागताः । अत्र हि कल्पनापोढपदेन सविकल्पकस्य व्यावृत्तिः, अभ्रांतमिति पदेन त्वाभासस्य । तथा च, समीचीनं निर्विकल्पकं प्रत्यक्षमित्युक्तं भवति । तदेतद्बालचेष्टितं । निर्विकल्पकस्य प्रामाण्यमेव दुर्लभं, समारोपाविरोधित्वात् । कुतः प्रत्यक्षत्वं व्यवसायात्मकस्यैव प्रामाण्यव्यवस्थापनात् ।

ननु 'निर्विकल्पकमेव प्रत्यक्षप्रमाणमर्थजत्वात् । तदेव हि परमार्थं सत् स्वलक्षणजन्यं, न तु सविकल्पकं, तस्यापरमार्थभूतसामान्यविषयत्वेनार्थजत्वाभावात्' इति चेन्न, अर्थस्यालोकवज्ज्ञानकारणत्वानुपपत्तेः ।

कथं पुनरेतेषां प्रत्यक्षशब्दवाच्यत्वमिति चेत् रूढित इति ब्रूमः । अथवा अक्ष्णोति व्याप्नोति जानातीत्यक्ष आत्मा तन्मात्रापेक्षोत्पत्तिकं प्रत्यक्षमिति किमनुपपन्नं ? तर्हि इंद्रियजन्यमप्रत्यक्षं प्राप्तमिति चेत् हंत विस्मरणशीलत्वं वत्सस्य । अवोचाम खल्वौपचारिकं प्रत्यक्षत्वमक्षजज्ञानस्य ततस्तस्याप्रत्यक्षत्वं कामं प्राप्नोतु, का नो हानिः ? एतेनाक्षेभ्यः परावृत्तं परोक्षमित्यपि प्रतिविहितं । अवैशद्यस्यैव परोक्षलक्षणत्वात् ।

स्यादेतत् 'अतींद्रियं प्रत्यक्षमस्तीत्यतिसाहसमसंभावितत्वात् । यद्यसंभावितमपि [illegible]ेत गगनकुसुमादिकमपि कल्प्यं स्यात्' । न स्याद्गगनकुसुमादेरप्रसिद्धत्वात् अतींद्रियप्रत्यक्षस्य तु प्रमाणसिद्धत्वात् । तथा हि– केवलज्ञानं तावत्किंचिज्ज्ञानां कपिलसुगतादीनामसंभवदप्यर्हतः संभवत्येव । सर्वज्ञो हि स भगवान् ।

ननु सर्वज्ञत्वमेवाप्रसिद्धं किमुच्यते सर्वज्ञोऽर्हन्निति क्वचिदप्यप्रसिद्धस्य विषयविशेषे व्यवस्थापयितुमशक्तेरिति चेन्न, सूक्ष्मांतरितदूरार्थाः कस्यचित्प्रत्यक्षा अनुमेयत्वादग्न्यादिवदित्यनुमानात्सर्वज्ञत्वसिद्धेः ।

तदुक्तं स्वामिभिर्महाभाष्यस्यादावाप्तमीमांसाप्रस्तावे—

"सूक्ष्मांतरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा ।
अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः" ॥१॥

सूक्ष्माः स्वभावविप्रकृष्टाः परमाण्वादयः, अंतरिताः कालविप्रकृष्टा रामादयः, दूरार्था देशविप्रकृष्टा मेर्वादयः एते स्वभावकालदेशविप्रकृष्टाः पदार्था धर्मित्वेन विवक्षितास्तेषां कस्यचित्प्रत्यक्षत्वं साध्यं । इह प्रत्यक्षत्वं प्रत्यक्षज्ञानविषयत्वं । विषयिधर्मस्य विषयेऽप्युपचारोपपत्तेः। अनुमेयत्वादिति हेतुः, अग्न्यादिर्दृष्टांतः । अग्न्यादावनुमेयत्वं कस्यचित्प्रत्यक्षत्वेन सहोपलब्धं परमाण्वादावपि कस्यचित्प्रत्यक्षत्वं साधयत्येव ।

# संस्कृतप्रवेशिनी।

विदित हो कि वर्तमानके समस्त विद्वानोंने निश्चय किया है कि–जबतक प्राचीन संस्कृत साहित्यका पुनरुद्धार व प्रचार न होगा तबतक हमारे देशकी, समाजकी उन्नति होना दुःसाध्य है। इसलिये अनेक विद्वान संस्कृत साहित्यके प्रचारार्थ प्राचीन कठिन साधनोंकी जगह नये २ ढंगकी पुस्तकें रच रच कर संस्कृत साहित्यकी उन्नति करनेमें लगे हैं **भारतीयजैनसिद्धांत प्रकाशिनी संस्था** व **जैनमित्रमंडलीने** भी संस्कृत विद्याकी उन्नति करनेवाले नये २ ग्रंथ प्रकाशित करनेका प्रयत्न करना प्रारंभ किया है। अनेक महाशय प्राचीन व्याकरणोंकी पद्धतिको क्लिष्ट व रटंत विद्या समझकर संस्कृतविद्या पढनेमें पश्चात्पद हो जाते हैं इसलिये संस्कृतमें सुगमतासे प्रवेश करानेकेलिये हमने आजतक छपेहुये समस्त व्याकरण संबंधी ग्रंथोंका मंथन करके यह **संस्कृतप्रवेशिनी** नामकी पुस्तक नवीन पद्धतिसे बहुत ही सुगमरीतिसे बनवाकर प्रकाशित की है। इसके पढनेमें व्याकरणके कठिन सूत्र व नियमादि कुछ भी रटने नहिं पडते। इसमें आये हुये कुछ शब्द व धातुओंका अर्थ मनन करने मात्रसे ही संस्कृतमें अनुबाद करना, संस्कृत भाषामें वार्त्तालाप करना व संस्कृत काव्योंका पठनपाठन बहुत ही सुगम हो जाता है। विशेषता इसमें यह है कि–क्या लड़के क्या स्त्री क्या वृद्धपुरुष सब ही बिना गुरुके इसे पढकर संस्कृत साहित्यमें प्रवेश कर सकते हैं।

जिनको संस्कृतमें वार्त्तालाप, संस्कृतसे भाषा व भाषासे संस्कृतमें अनुबाद करना वा संस्कृतके बडे २ काव्य पढने हों अथवा बंगाल बिहार उडीसा आदि संस्कृत यूनिवर्सिटियोंमें व्याकरण काव्यकी मध्यमा परीक्षा देना हो तथा संस्कृतके साथ इंट्रेंस एफ्० ए० बी० ए० परीक्षा देना हो, वे सबसे पहिले इस पुस्तकको पढ लें, उनके लिये संस्कृतकी ये सब परीक्षायें सुगम हो जायगी। मूल्य प्रथम भागका १) रु० दूसरे भागका १) रु०

मिलनेका पता—

**मैनेजर–जैन मित्रमंडली,**

**पो० बाघबाजार, कलकत्ता।**